# Shri VyAdeshvara Kripa Kavacham

# श्रीव्याडेश्वरकृपाकवचम्

## Document Information

Text title : VyAdeshvara Kripa Kavacham

File name : vyADeshvarakRRipAkavacham.itx

Category : shiva, kavacha

Location : doc_shiva

Author : Diwakar Anant Ghaisas guruji (Brihatstotraratnakara, Dhavale Prakashan)

Transliterated by : NA

Proofread by : NA

Latest update : January 14, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose. Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

**Please help to maintain respect for volunteer spirit.**

September 20, 2019

*sanskritdocuments.org*

# श्रीव्याडेश्वरकृपाकवचम्

श्रीगणेशाय नमः ।
गुहागरस्थितः साक्षान्महाव्याडेश्वरः शिवः ।
पातु मां सङ्कटात्सत्यं शरणागतवत्सलः ॥ १॥

स मामवतु दुर्भिक्षे सुखे दुःखे दिने दिने ।
परिवारं सदा पातु सदनं त्रिपुरान्तकः ॥ २॥

मम चेतश्च बुद्धिं च धूर्जटी पातु मे मनः ।
वृत्तिं पातु पिनाकी मे व्यवसायं जटाधरः ॥ ३॥

भूमौ तथा पितृलोके लोकनाथः सदाशिवः ।
स्वर्गे रक्षतु सर्वेशो महादेवश्च सर्वदा ॥ ४॥

शीर्षं मे शङ्करः पातु भालं रक्षतु वै भवः ।
नेत्रौ दृष्टिं नीलकण्ठः श्रुतिं भूतेश्वरस्तथा ॥ ५॥

भार्गवस्थापितः स्थाणुर्मस्तकं मे सदाऽवतु ।
घ्राणं मृत्युञ्जयः पातु मुखं कोङ्कणरक्षकः ॥ ६॥

ओष्ठौ वाणी च जिह्वां च रक्षतां चन्द्रशेखरः ।
कन्धरामीश्वरः पातु भुजौ पञ्चाननस्तथा ॥ ७॥

स्कन्धौ महेश्वरः पातु करौ मे शैलजापतिः ।
हस्तौ रक्षेदाशुतोषो विश्वनाथः कराङ्गुलीः ॥ ८॥

भस्मधारी करपृष्ठे शूली करतले तथा ।
हृदयं पातु योगीशः उरो मे पार्वतीप्रियः ॥ ९॥

जठरं हव्यवाण्नेत्रो नाभिं भक्तमनोगतः ।
स्मरान्तकः कटी पातु सक्थिनी विमलान्तरः ॥ १०॥

गुहग्रामेश्वरः पातु जङ्घे ऊरू च गुह्यकम् ।

जानुनी स्थाणुरूपेण रक्षेन्मम पुरान्तकः ॥ ११॥

गुल्फ गुहपिता रक्षेच्चरणौ कुलदैवतम् ।
सर्वाङ्गाणि विभू रक्षेत् त्वग्रक्षेद्भयनाशनः ॥ १२॥

धर्मं मेऽवतु संहर्ता कर्म रक्षेत्पिनाकवान् ।
पुण्यं मे पातु काशीशो धैर्यं रक्षतु वै हरः ॥ १३॥

रुद्रो मे सन्ततिं पातु पशून्पशुपतिस्तथा ।
वाहनं सर्वगः शम्भुः शीलं त्र्यम्बकवैभवः ॥ १४॥

वर्त्म कैलासनाथश्च पातु मे कुलदैवतम् ।
सम्पदं साम्ब आनन्दं पातु नर्तनपण्डितः ॥ १५॥

सर्वस्थानेषु कालेषु रक्षेन्मां गिरिजापतिः ।
कवचस्मरणेनैव पातु व्याडेश्वरः स्वयम् ॥ १६॥

प्रभाते वा प्रदोषे वा दिने रात्र्यां पठेन्नरः ।
विघ्नानि तस्य नश्येयुः सर्वदा सुखभाग्भवेत् ॥ १७॥

अरुणोदयकाले वा जपेद्दीपकसन्निधौ ।
अमोघं कवचं भूयात्प्रज्ञाङ्कुरप्रवर्तनम् ॥ १८॥

अष्टादशेषु लोकेषु रक्षां व्याडेश्वरकृताम् ।
प्राप्य भक्तो भवेन्नित्यं सदा शिवकृपाङ्कितः ॥ १९॥

ध्यायेद्व्याडेश्वरं नित्यं जपेन्नाम शिवस्य च ।
सद्धर्मकर्मसंयुक्तः सदाचारी सुखी भवेत् ॥ २०॥

एतत्तु कवचं श्रद्धाभक्तियुक्तेन चेतसा ।
दिवाकरकविप्राप्तं हृदयानन्दकारणम् ॥ २१॥

इति श्रीअनन्तसुत-श्रीदिवाकरविरचितं श्रीव्याडेश्वरकृपाकवचं सम्पूर्णम् ॥

*Shri VyAdeshvara Kripa Kavacham*

pdf was typeset on September 20, 2019

Please send corrections to *sanskrit@cheerful.com*